Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 5 | ISSN : 2581- 6306

# शास्त्रशिक्षणे प्रामाण्यवाद:



**डॉ. कुलदीपसिंहः**
सहायकाचार्यः (शिक्षाशास्त्रम्)
ज.रा.राजस्थानसंस्कृतविश्वविद्यालयः
जयपुरम्, राजस्थानम्, भारतम्

**सारांश: –** आत्यन्तिकसत्यस्य यथार्थज्ञानस्य वा गवेषणा भारतीयदार्शनिकवादानां मुख्यविशेषता भवति। ज्ञानं स्वयम् आत्मनो यथार्थताया: प्रमाणं ददाति, अथवा अन्यै: प्रमाणै: ज्ञानस्य प्रामाणिकता प्रमाणिता भवति इति प्रश्नस्य उत्तरं ददाति प्रामाण्यवाद:। प्रामाण्यवाद: स्वत: परत: इति भेदेन द्विविधो भवति। यथा यथार्थज्ञानं प्रतिष्ठापयितुं प्रामाण्यवादो भवति, तथैव अयथार्थज्ञानं प्रमाणीकर्तुम् अप्रामाण्यवादोऽपि भवति। पत्रेऽस्मिन् बहुभि: उदाहरणै: प्रामाण्यवादस्य विषये विमृष्टोऽस्ति। कस्मिन् दर्शने स्वत: प्रामाण्यवादोऽस्ति, परत: प्रामाण्यवादश्चास्ति इत्यपि पत्रेऽस्मिन् समुपवर्णितमस्ति।

**उद्देश्यानि –**

1. प्रामाण्यवादस्य अवधारणाया: स्पष्टीकरणम्।
2. विविधानां दर्शनानां मते ज्ञानस्य प्रामाण्यवादविषयकचिन्तनस्य उपस्थापनम्।
3. प्रामाण्यवादस्य अप्रामाण्यवादस्य च मध्ये भेदस्पष्टीकरणम्।

**मुख्यशब्दा: –**प्रमा, प्रमाणम्, प्रमिति:, प्रमेयम्, स्वत: प्रामाण्यवाद:, परत: प्रामाण्यवाद:, अप्रामाण्यवाद:, मीमांसका:, नैयायिका:।

---

प्रामाण्यवाद: भारतीयदर्शनस्य ज्ञानमीमांसया सम्बद्ध: कश्चन गभीर: महत्त्वपूर्णश्च विषय: अस्ति। प्रामाण्यवाद: कश्चन प्रयास: अस्ति**,** येन कस्यचित् ज्ञानस्य वैधताया: निर्णय: भवति। ज्ञानस्य वैधता प्रामाण्यं वा ज्ञानेन सहैव उत्पद्यते अथवा ज्ञानप्राप्ते: परं भिन्नप्रक्रियया अर्थात् परत: प्रमाणै: उत्पद्यते इति प्रामाण्यवादस्य मूलसमस्या भवति। अत्र एषा अपि समस्या अन्तर्भवति यत् ज्ञाने अवैधता अप्रामाण्यं वा स्वत: उत्पद्यते अथवा तदपि परत: प्रमाणै: एव उत्पद्यते इति।

प्रामाण्यवादस्य एनां समस्याम् एकेन व्यावहारिकोदाहरणेन स्पष्टां कर्तुं शक्नुम:। यदा कस्मिंश्चित् मार्गे एकस्मिन् धनस्यूते शतस्य रूप्यकपत्रं स्पष्टतया दृश्यते, तदा प्रत्यक्षं ज्ञानं भवति यत् शतं रूप्यकाणि एतस्य पत्रस्य मूल्यम् अस्ति इति। यदा कश्चन प्रामाणिक: पुरुष: वदति यत् एतस्मिन्

धनस्यूते शतस्य रूप्यकाणाम् एकं पत्रमस्ति, तदा शब्दप्रमाणेन धनराशि: ज्ञायते। यदा च धनस्य स्यूते तत् पत्रम् अस्ति, तत्र 100 इति संख्या मुद्रिता अस्ति, यथा अन्येषु धनपत्रेषु भारतस्य राजचिह्नं प्रामाणिकं हस्ताक्षरं च भवति, तथैव एतस्मिन् अपि अस्ति इति प्रमाणेन धनपत्रस्य मूल्यं ज्ञायते, तदा अनुमानप्रमाणेन तज्ज्ञानं भवति। एवं प्रकारेण धनविषये यथार्थज्ञानं भवति। किन्तु एतादृशं ज्ञानं वस्तुत: यथार्थज्ञानम् अस्ति न वा इत्यस्य किं प्रमाणम् ? इति प्रश्न: समुदेति। एतादृशस्य प्रश्नस्य समाधानाय दार्शनिकचिन्तकै: प्रामाण्यवाद: शरणीक्रियते। प्रमाणानां यो भावो धर्मो वा भवति, तदेव प्रामाण्यं भवति।

**वस्तुत:** भारतीयदर्शनपरम्परायां पदार्थानां विवेचनार्थं मुख्यतया प्रमाणम्, प्रमेयम्, प्रमिति:, प्रमाता चेति चत्वार: अंशा: भवन्ति। तत्र -

**प्रमाणम्** – येन विषयस्य निश्चयात्मकं ज्ञानं भवति, तत् प्रमाणम्।

**प्रमेयम्** – प्रमाणेन यस्य विषयवस्तुन: ज्ञानं भवति, तत् प्रमेयम्।

**प्रमिति:** – प्रमाणेन यस्य विषयस्य निश्चयात्मकं ज्ञानं भवति, सा प्रमिति:।

**प्रमाता** – प्रमाणेन प्रमेयज्ञानं यो जानाति, स: प्रमाता।

दार्शनिकपरम्परायां यथार्थज्ञानं 'प्रमा' इत्युच्यते। अर्थात् य: पदार्थो भवति, तस्य तेनैव प्रकारेण ग्रहणं प्रमेति। यथा घटस्य घटरूपेण ज्ञानं प्रमा, जलस्य जलरूपेण ज्ञानं प्रमेति। प्रमाया: करणं प्रमाणं भवति। सैषा प्रमा ज्ञानपदेन उपलब्धिपदेन वापि व्यवह्रियते।

तत्र वेदवाक्यानां यथार्थताविषये प्रमाणस्य जिज्ञासा जागर्ति। अस्यां जिज्ञासायां प्रत्यक्षम्, अनुमानम्, उपमानम्, आप्तवाक्यम् इत्यादिभि: प्रमाणै: वेदज्ञानस्य यथार्थता मन्यते। प्रमाणस्य आधार: एव प्रामाण्यं भवति। प्रमाणशब्दात् ष्यञ् प्रत्यये प्रामाण्यम् इति शब्द: निष्पद्यते। वदति इति वाद:। प्रामाण्यं वदति इति प्रामाण्यवाद:।

यथा पूर्वमुक्तमेव यत् येन विषयस्य निश्चयात्मकं ज्ञानं भवति, तत् प्रमाणं भवतीति। किन्तु प्रामाण्यवादस्य भूमिकायाम् आदौ एतत् ज्ञातव्यं यत् प्रमाणं कतिधा भवति। किं दर्शनं कतिविधं प्रमाणम् अङ्गीकरोति।

**प्रमाणस्य प्रकारा:**

**प्रत्यक्षमनुमानञ्च शाब्दं चोपमितिस्तथा।**
**अर्थापत्तिरभावश्च षट् प्रमाणानि भादृशाम्।।**

अर्थात् प्रत्यक्षम्, अनुमानम्, शाब्दम्, उपमानम्, अर्थापत्ति: अभावश्चेति षड्विधं प्रमाणं मुख्यतया भवति। तत्र साक्षात्प्रतीति: **प्रत्यक्षं प्रमाणं** भवति। अवस्थादृष्ट्या प्रत्यक्षं निर्विकल्पं

सविकल्पमिति द्विधा भवति। निर्विकल्पं प्रत्यक्षं तद्भवति यत्र केवलं वस्तुन: अस्तित्वस्य ज्ञानं भवति। यथा 'इदम्' इति निर्विकल्पं प्रत्यक्षम् अस्ति। अत्र स्वरूपस्य बोधो न भवति। अत: परं द्वितीयावस्था भवति, यत्र दृष्टा वस्तुन: स्वरूपम्, गुणं धर्मं च विज्ञाय वस्तु परिचिनोति। यथा 'इदं पुस्तकम्' इति सविकल्पकं ज्ञानं भवति। **अनुमितिकरणम् अनुमानं** भवति। प्रतिज्ञा-हेतु-दृष्टान्त-उपनय-निगमनानि चाधारीकृत्य अनुमानप्रमाणं प्रवर्तते। **उपमितिकरणम् उपमानं** भवति। यथा गोसदृशो गवय: इति। उपमानप्रमाणे प्रत्यक्षात्परं सादृश्यज्ञानेन यथार्थज्ञानं भवति। पौरुषेयापौरुषेयवाक्यप्रमाणं **शाब्दप्रमाणं** भवति। **अर्थापत्तिरपि दृष्ट: श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इत्यर्थकल्पना** अर्थात् विरोधाभासे उत्पन्नं काठिन्यं दूरीकर्तुं येन हेतुना काचित् कल्पना क्रियते, सा अर्थापत्तिरिति। सैषा अर्थापत्ति: दृष्टार्थापत्ति:, श्रुत्वार्थापत्ति: इति द्विधा भवति। यथा कस्मिंश्चत् प्रकोष्ठे नृत्ये काले 'पिधानं कुरु' इति वाक्येन नृत्यस्य पिधानम् उत प्रकोष्ठस्य द्वारस्य पिधानमिति संशये द्वारस्य पिधानमित्यर्थकल्पना अर्थापत्ति: भवति। **अभाव: अर्थात् अनुपलब्धिरिति।** यथा कस्मिंश्चित् भवने सर्वं वस्तु अस्ति, किन्तु घट: नास्ति। घटस्य अभाव: एव घटस्य अनुपलब्धे: बोधक: भवति। यथा तस्मिन् गृहे सर्वेषां वस्तूनां भावस्य साक्षात् ज्ञानं भवति, तथैव घटस्य अभावस्य ज्ञानमपि साक्षादेव भवति।

तत्र चार्वाका: केवलं प्रत्यक्षं प्रमाणं स्वीकुर्वन्ति। बौद्धा: वैशेषिकाश्च प्रत्यक्षम् अनुमानं च प्रमाणरूपेण अङ्गीकुर्वन्ति। भासर्वज्ञनामका: नैयायिका: सांख्याश्च प्रत्यक्षम्, अनुमानं शब्दं च प्रमाणत्रयरूपेण आमनन्ति। भासर्वज्ञनैयायिकेतरे नैयायिका: प्रत्यक्षम्, अनुमानम्, उपमानं शब्दं चेति प्रमाणचतुष्टयं स्वीकुर्वन्ति। प्राभाकरमीमांसका: प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दम् अर्थवृत्तिं चेति प्रमाणपञ्चकं स्वीकुर्वन्ति। वेदान्तिन: भाट्टमीमांसकाश्च अनेन प्रमाणपञ्चकेन सह अनुपलब्धिमपि प्रमाणरूपेण अङ्गीकृत्य षट् प्रमाणानि स्वीकुर्वन्ति। पौराणिका: उपर्युक्तै: षड्भि: प्रमाणै: सह सम्भवम् ऐतिह्यं चेति प्रमाणद्वयं स्वीकृत्य अष्टौ प्रमाणानि आमनन्ति। यथोक्तम् -


**चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ**,
**भासर्वज्ञश्च सांख्यास्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति।**
**प्राहु: प्राभाकरा: पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञा:**,
**षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात्।।**

**ज्ञानस्य प्रामाणिकता**

भारतीयदार्शनिकै: ज्ञानस्य प्रामाणिकताविषये गाम्भीर्येण विचारो विहित:। ज्ञानस्य प्रामाणिकता इत्यस्य अयमाशयो यत् प्रमाणै: यत् ज्ञानं प्राप्तमस्ति, तस्य सत्यताया: यर्थाथताया: वा निर्णय: इति। भारतीयदर्शनपरम्परायाम् एष विचार: प्रामाण्यवाद: इत्युच्यते। किन्तु ज्ञानस्य प्रामाणिकता कथं स्यादित्यत्र दार्शनिकेषु मतद्वयम् अस्ति। तत्र प्रथममते मन्यते यत् ज्ञानस्य यथार्थता स्वयमेव सिद्धा भवति। एष सिद्धान्त: **स्वत: प्रामाण्यवाद:** इत्युच्यते। एतद्विपरीतपक्षे अन्ये दार्शनिका:

चिन्तयन्ति यत् ज्ञानस्य सत्यता स्वत: सिद्धा न भवति। तस्य सत्यताया: निर्धारणं प्रमाणै: क्रियते। एष सिद्धान्त: **परत: प्रामाण्यवाद:** इत्युच्यते। पूर्वोक्तेन उदाहरणेन चिन्तयामश्चेत् शतस्य रूप्यकाणां यत् धनपत्रमस्ति, तस्य सत्यताया: प्रमाणं तत् धनपत्रं स्वयमेव अस्ति। कुतश्चित् अन्यत: तस्य प्रमाणिकतायै किमपि आनेतव्यं नास्ति। धनपत्रस्य शुद्धतायै प्रामाणिकतायै यत् यत् प्रमाणम् आवश्यकम्, तत् तत् सर्वं धनपत्रे एव अस्ति। एतदेव स्वत: प्रमाणम् अस्ति। एवमेव यदि तस्य धनपत्रस्य शुद्धतायै प्रामाणिकतायै च वित्तकोषं गच्छति, तत: विशेषज्ञेन परीक्ष्य धनपत्रस्य प्रामाणिकतां निश्चिनोति, तर्हि तत् परत: प्रमाणमिति वक्तव्यम्।

यथा प्रामाण्यवाद: ज्ञानस्य वैधतां (Validity of Knowledge) सूचयति, तथैव अप्रामाण्यवाद: ज्ञानस्य अवैधतां (Invalidity of Knowledge) सूचयति। अत्र अप्रामाण्यवादेन अयथार्थज्ञानस्य परीक्षणेन आशयोऽस्ति। प्रामाण्यवादवदेव अप्रामाण्यं परीक्षितुमपि स्वत: प्रमाणानां परत: प्रमाणानां च आवश्यकता भवति। प्रामाण्यवादस्य स्वरूपम् अधोदत्ते रेखाचित्रे द्रष्टुं शक्यते –




अनेन विवरणेन स्पष्टं भवति यत् यथार्थज्ञानं कर्तुं यथार्थज्ञानसामग्र्यामेव यदि प्रामाणिकता मन्यते, तर्हि स: स्वत: प्रामाण्यवादो भवति। यदि च यथार्थज्ञानसामग्र्या: प्रामाणिकता बाह्यप्रमाणै: प्रमाणिता भवति, तर्हि स: परत: प्रामाण्यवादो भवति। यथा सरोवरे जलं वीक्ष्य स्वत: प्रामाण्यवादिन: चाक्षुषप्रत्यक्षं कृत्वा स्वत: प्रमाणेन जलमिति वदिष्यन्ति किन्तु परत: प्रामाण्यवादिन: तज्जलं पीत्वा रासनप्रत्यक्षेण परत: प्रमाणदिशा जलमिति स्वीकरिष्यन्ति। विविधेषु दर्शनेषु ज्ञानस्य प्रामाण्याप्रामाण्यविषये मतैक्यं नास्ति, तद्यथा –

| | | |
|---|---|---|
| स्वत: प्रामाण्यं परत: अप्रामाण्यं च | - | मीमांसादर्शनम्, वेदान्तदर्शनम् |
| स्वत: प्रामाण्यं स्वत: अप्रामाण्यं च | - | सांख्यदर्शनम् |
| परत: प्रामाण्यं परत: अप्रामाण्यं च | - | न्यायदर्शनम् |
| परत: प्रामाण्यं स्वत: प्रमाण्यं च | - | बौद्धदर्शनम् |

**स्वत: प्रामाण्ये काठिन्यम् –**

नैयायिका: वदन्ति यत् स्वत: प्रामाण्ये दोषो भवति यत् बहुधा भ्रान्ते: निवारणं भवितुं नार्हति। श्वेतपेयमिति दुग्धमिति स्वत: प्रमाणिते सति यथार्थत: तक्रस्यापि ज्ञानं न भवति।

**परत: प्रामाण्ये काठिन्यम् –**

परत: प्रामाण्ये किमपि एकं प्रमाणं पर्याप्तं न प्रतीयते अत: बहुभि: प्रमाणै: प्रमाणीकरणस्य आवश्यकता भवति। अत: एव अनेकानि प्रमाणानि मन्तव्यानि भवन्ति।

**समाधानम्**

परत: प्रामाण्यस्य आलोचनायाम् उत्तरत्वेन नैयायिका: वदन्ति यत् एषा आपत्ति: मूलहीनैव। व्यवहारे तु एकेन प्रमाणेन सिद्धे द्वितीयप्रमाणस्य आवश्यकता न भवति। यथा राज्ञ: भोजने विषस्य आशङ्कायां पाचक: एव स्वयं स्वनिर्मितं भुक्त्वा भोजनस्य विषहीनतां प्रमाणीकरोति। प्रामाण्यवादस्य सिद्धान्त: लोके अपि प्रचलित: अस्ति। शिक्षायामपि शास्त्रपद्धते: प्रामाण्यवादस्य समुपयोगो भवति। गुरु: यत् वदति तदात्मनि स्वत: प्रमाणितमपि भवति, परत: प्रमाणैश्चापि तत्प्रमाणितं भवति। एवमवे छात्रोऽपि यदुत्तरं वदति तदपि स्वत: प्रमाणितं परत: प्रमाणितं च भवति।

**उपसंहार:**

विविधै: प्रमाणै: ज्ञानस्य यथार्थताया: निश्चय: क्रियते। यथा ज्ञानसामग्री आत्मनि एव वैधा भवति, तदा स्वत: प्रामाण्यवाद: इत्युच्यते। यदा ज्ञानं बाह्यसाधनै: यथा प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दम्, अर्थापत्ति:, अभाव: चेत्यादिभि: प्रमाणै: प्रमाणितं भवति, तदा तत् परत: प्रामाण्यवाद: इत्युच्यते। मीमांसका: वेदान्तिनश्च ज्ञानस्य स्वत: प्रामाण्यं परत: अप्रामाण्यं च अङ्गीकुर्वन्ति। नैयायिका: ज्ञानस्य परत: प्रामाण्यं परत: अप्रामाण्यं च स्वीकुर्वन्ति। प्रामाण्यवाद: लोकव्यवहारेणापि सिद्धो भवति। ज्ञानस्य सत्यतापरीक्षणे शास्त्रस्य प्रामाण्यवादप्रक्रिया महोपकारिका भवति।

**सहायकग्रन्था:**


1. अन्नम्भट्टविरचित: तर्कसङ्ग्रह:
2. केशवमिश्रप्रणीता तर्कभाषा
3. अवस्थी, प्रेमा; मीमांसा दर्शन, सुरभारती प्रकाशन, कानपुर।
4. निगम शोभा; भारतीय दर्शन, मोतीलाल बनारसी दास, दिल्ली।
5. राधाकृष्णन् एस.; भारतीय दर्शन (भाग 1-2), राजपाल एण्ड सन्स, दिल्ली।
6. मिश्र, उमेश; भारतीय दर्शन, हिन्दी समिति, सूचना विभाग, उत्तर प्रदेश।